

# સર્વદેવ કૃત શ્રી લક્ષ્મી સ્તોત્રમ્-ક્ષમસ્વ ભગવત્યંબ ક્ષમા

https://www.chalisa.online

|| સર્વદેવ કૃત શ્રી લક્ષ્મી સ્તોત્રમ્ ||
ક્ષમસ્વ ભગવત્યંબ ક્ષમા શીલે પરાત્પરે।
શુદ્ધ સત્વ સ્વરૂપેચ કોપાદિ પરિ વર્જિતે॥
ઉપમે સર્વ સાધ્વીનાં દેવીનાં દેવ પૂજિતે।
ત્વયા વિના જગત્સર્વ મૃત તુલ્યંચ નિષ્ફલમ્।
સર્વ સંપત્સ્વરૂપાત્વં સર્વેષાં સર્વ રૂપિણી।
રાસેશ્વર્યધિ દેવીત્વં ત્વત્કલાઃ સર્વયોષિતઃ॥
કૈલાસે પાર્વતી ત્વંચ ક્ષીરોધે સિંધુ કન્યકા।
સ્વર્ગેચ સ્વર્ગ લક્ષ્મી સ્ત્વં મર્ત્ય લક્ષ્મીશ્ચ ભૂતલે॥
વૈકુંઠેચ મહાલક્ષ્મીઃ દેવદેવી સરસ્વતી।
ગંગાચ તુલસીત્વંચ સાવિત્રી બ્રહ્મ લોકતઃ॥
કૃષ્ણ પ્રાણાધિ દેવીત્વં ગોલોકે રાધિકા સ્વયમ્।
રાસે રાસેશ્વરી ત્વંચ બૃંદા બૃંદાવને વને॥
કૃષ્ણ પ્રિયા ત્વં ભાંડીરે ચંદ્રા ચંદન કાનને।
વિરજા ચંપક વને શત શૃંગેચ સુંદરી।
પદ્માવતી પદ્મ વને માલતી માલતી વને।
કુંદ દંતી કુંદવને સુશીલા કેતકી વને॥
કદંબ માલા ત્વં દેવી કદંબ કાનને2પિચ।
રાજલક્ષ્મીઃ રાજ ગેહે ગૃહલક્ષ્મી ર્ગૃહે ગૃહે॥
ઇત્યુક્ત્વા દેવતાસ્સર્વાઃ મુનયો મનવસ્તથા।
રૂરુદુર્ન મ્રવદનાઃ શુષ્ક કંઠોષ્ઠ તાલુકાઃ॥
ઇતિ લક્ષ્મી સ્તવં પુણ્યં સર્વદેવૈઃ કૃતં શુભમ્।
યઃ પઠેત્પ્રાતરુત્થાય સવૈસર્વ લભેદ્ધ્રુવમ્॥
અભાર્યો લભતે ભાર્યાં વિનીતાં સુસુતાં સતીમ્।
સુશીલાં સુંદરીં રમ્યામતિ સુપ્રિયવાદિનીમ્॥
પુત્ર પૌત્ર વતીં શુદ્ધાં કુલજાં કોમલાં વરામ્।
અપુત્રો લભતે પુત્રં વૈષ્ણવં ચિરજીવિનમ્॥
પરમૈશ્વર્ય યુક્તંચ વિદ્યાવંતં યશસ્વિનમ્।
ભ્રષ્ટરાજ્યો લભેદ્રાજ્યં ભ્રષ્ટ શ્રીર્લભેતે શ્રિયમ્॥
હત બંધુર્લભેદ્બંધું ધન ભ્રષ્ટો ધનં લભેત્॥
કીર્તિ હીનો લભેત્કીર્તિં પ્રતિષ્ઠાંચ લભેદ્ધ્રુવમ્॥
સર્વ મંગળદં સ્તોત્રં શોક સંતાપ નાશનમ્।
હર્ષાનંદકરં શાશ્વદ્ધર્મ મોક્ષ સુહૃત્પદમ્॥
॥ ઇતિ સર્વ દેવ કૃત લક્ષ્મી સ્તોત્રં સંપૂર્ણ ॥

|| https://www.chalisa.online ||